योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०३०

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

पृथिव्यप्तेजसां तत्र नभस्वन्नभसोरपि ।

यथोत्तरं दशगुणानतीत्यावरणान्क्षणात् ।। १

ददर्श परमाकाश तत्प्रमाणविवर्जितम् ।

तथा ततं जगदिदं यथा तत्राण्डमात्रकम् ।। २

तादृशावरणान्सर्गान्ब्रह्माण्डेषु ददर्श सा ।

कोटिशः स्फुरितान्व्योम्नि त्रसरेणूनिवातपे ।। ३

महाकाशमहाम्भोधौ महाशून्यत्ववारिणि ।

महाचिद्द्रवभावोत्थान्बुद्बुदानर्बुदप्रभान् ।। ४

कांश्चिदापततोऽधस्तात्कांश्चिच्चोपरि गच्छतः ।

कांश्चित्तिर्यग्गतीनन्यान्स्थितांस्तब्धान्स्वसंविदा ।। ५

यत्र यत्रोदिता संविद्येषां येषां यथा यथा ।

तत्र तत्रोदितं रूपं तेषां तेषां तथा तथा ।। ५

नेहैव तत्र नामोर्ध्वं नाधो न च गमागमाः ।

अन्यदेव पदं किंचित्तस्माद्देहागमं हि तत् ।। ७

उत्पद्योत्पद्यते तत्र स्वयं संवित्स्वभावतः ।

स्वसंकल्पैः शमं याति बालसंकल्पजालवत् ।। ८

श्रीराम उवाच ।

किमधः स्यात्किमूर्ध्वं स्यात्किं तिर्यक्तत्र भासुरे ।

इति ब्रूहि मम ब्रह्मन्निहैव यदि न स्थितम् ।। ९

श्रीवसिष्ठ उवाच ।

ससर्वावरणा एते महत्यन्तविवर्जिते ।

ब्रह्माण्डा भान्ति दुर्दृष्टेर्व्योम्नि केशोण्ड्रको यथा ।। १० ।

अस्वातन्त्र्यात्प्रधावन्ति पदार्थाः सर्व एव यत् ।

ब्रह्माण्डे पार्थिवो भागस्तदधस्तूर्ध्वमन्यथा ।। ११

पिपीलिकानां महतां व्योम्नि वर्तुललोष्टके ।

दशदिक्कमधः पादाः पृष्ठमूर्ध्वमुदाहृतम् ।। १२

वृक्षवल्मीकजालेन केषांचिद्धृदि भूतलम् ।

ससुरानरदैत्येन वेष्टितं व्योम निर्मलम् ।। १३

संभूतं सह भूतेन सग्रामपुरपर्वतम् ।

इदं कल्पनभूतेन पक्वाक्षोटमिव त्वचा ।। १४

यथा विन्ध्यवनाभोगे प्रस्फुरन्ति करेणवः ।

तथा तस्मिन्पराभोगे ब्रह्माण्डत्रसरेणवः ।। १५

तस्मिन्सर्वं ततः सर्वं तत्सर्वं सर्वतश्च यत् ।

तच्च सर्वमयो नित्यं तथा तदणुकं प्रति ।। १६

शुद्धबोधमये तस्मिन्परमालोकवारिधौ ।

अजस्रमेत्य गच्छन्ति ब्रह्मण्डाख्यास्तरङ्गकाः ।। १७

अन्तःशून्याः स्थिताः केचित्संकल्पक्षयरात्रयः ।

तरङ्गा इव तोयेऽब्धौ प्रोह्यन्ते शून्यतार्णवे ।। १८

केषांचिदन्तःकल्पान्तः प्रवृत्तो घर्घरारवः ।

न श्रुतोऽन्यैर्न च ज्ञातः स्वभावेन रसाकुलैः ।। १९

अन्येषां प्रथमारम्भे शुद्धभूषु विजृम्भते ।

सर्गः संसिक्तबीजानां कोशेऽङ्कुरकला यथा ।। २०

महाप्रलयसंपत्तौ सूर्यार्चिर्विद्युतोऽद्रयः ।

प्रवृत्ता गलितुं केचित्तापे हिमकणा इव ।। २१

आकल्पं निपतन्त्येव केचिदप्राप्तभूमयः ।

यावद्विशीर्य जायन्ते तथा संविन्मयाः किल ।। २२

स्तब्धा इव स्थिताः केचित्केशोण्ड्रकमिवाम्बरे ।

वायोः स्पन्दा इवाभान्ति तथा प्रोदितसंविदः ।। २३

आचाराद्वेदशास्त्राणामाद्य एवान्यथोदिते ।

आरम्भोऽपि तथान्येषामनित्यः संस्थितः क्रमः ।। २४

केचिद्ब्रह्मादिपुरुषाः केचिद्विष्ण्वादिसर्गपाः ।

केचिच्चान्यप्रजानाथाः केचिन्निर्नाथजन्तवः ।। २५

केचिद्विचित्रसर्गेशाः केचित्तिर्यङ्मयान्तराः ।

केचिदेकार्णवापूर्णा इतरे जनिवर्जिताः ।। २६

केचिच्छिलाङ्गनिष्पिण्डाः केचित्कृमिमयान्तराः ।

केचिद्देवमया एव केचिन्नरमयान्तराः ।। २७

केचिन्नित्यान्धकाराढ्यास्तथा शीलितजन्तवः ।

केचिन्नित्यप्रकाशाढ्यास्तथा शीलितजन्तवः ।। २८

केचिन्मशकसंपूर्णा उदुम्बरफलश्रियः ।

नित्यं शून्यान्तराः केचिच्छून्यस्पन्दात्मजन्तवः ।। २९

सर्गेण तादृशेनान्ये पूर्णा येऽन्तर्धियामिह ।

कल्पनामपि नायान्ति व्योमपूर्णाचलो यथा ।। ३०

तादृगम्बरमेतेषां महाकाशं ततं स्थितम् ।

आजीवितं प्रगच्छद्भिर्विष्ण्वाद्यैर्यन्न मीयते ।। ३१

प्रत्येकस्याण्डगोलस्य स्थितः कटकरत्नवत् ।

भूताकृष्टिकरो भावः पार्थिवः स्वस्वभावतः ।। ३२

यः सर्वविभवोऽस्माकं धियां न विषयं ततः ।

तज्जगत्कथने शक्तिर्न ममास्ति महामते ।। ३३

भीमान्धकारगहने सुमहत्यरण्ये

नृत्यन्त्यदर्शितपरस्परमेव मत्ताः ।

यक्षा यथा प्रवितते परमाम्बरेऽन्त-

रेवं स्फुरन्ति सुबहूनि महाजगन्ति ।। ३४

इत्यार्षे श्रीवासिष्ठमहारामायणे मोक्षोपाये उत्पत्तिप्रकरणे लीलो० विचित्रब्रह्माण्डकोटिवर्णनं नाम त्रिंशः सर्गः ।। ३०

।।